## ०८. प्रीणयामो वासुदेवं

वंदिताशेषवंद्योरुवृंदारकं चंदनाचर्चितोदारपीनांसकं।
इंदिराचंचलापांग नीराजितम् मंदरोद्धारिवृत्तोद्भुजाभोगिनं।
प्रीणयामो वासुदेवं देवतामंडलाखंडमंडनं।१।

सृष्टिसंहारलीलाविलासाततं पुष्टषाड्गुण्यसद्विग्रहोल्लासिनं।
दुष्टनिःशेषसंहारकर्मोद्यतं हृष्टपुष्टानुशिष्टप्रजासंश्रयं।
प्रीणयामो वासुदेवं देवतामंडलाखंडमंडनं।२।

उन्नतप्रार्थिताशेषसंसाधकं सन्नतालौकिकानंददश्रीपदं।
भिन्नकर्माशयप्राणिसंप्रेरकं तन्न किं नेति विद्वत्सु मीमांसितं।
प्रीणयामो वासुदेवं देवतामंडलाखंडमंडनं।३।

विप्रमुख्यैः सदा वेदवादोन्मुखैः सुप्रतापैः क्षितीशेश्वरैश्चार्चितं।
अप्रतर्क्योरुसंविद्गुणं निर्मलं सप्रकाशाजरानंदरूपं परं।
प्रीणयामो वासुदेवं देवतामंडलाखंडमंडनं।४।

अत्ययो यस्य केनापि न क्वापि हि प्रत्ययो यद्गुणेषूत्तमानां परः।
सत्यसंकल्प एको वरेण्यो वशी  मर्त्यनूनैः सदा वेदवादोदितः।
प्रीणयामो वासुदेवं देवतामंडलाखंडमंडनं।५।

पश्यतां दुःखसंताननिर्मूलनं दृश्यतां दृश्यतामित्यजेशार्चितं।
नश्यतां दूरगं सर्वदाऽप्यात्मगं वश्यतां स्वेच्छया सज्जनेष्वागतं।
प्रीणयामो वासुदेवं देवतामंडलाखंडमंडनं।६।

अग्रजं यः ससर्जाजमग्र्याकृतिं विग्रहो यस्य सर्वेगुणा एव हि।
उग्र आद्योऽपि यस्यात्मजाग्र्यात्मजः सद्गृहीतः सदा यः परं दैवतं।
प्रीणयामो वासुदेवं देवतामंडलाखंडमंडनं।७।

अच्युतो  यो गुणैर्नित्यमेवाखिलैः प्रच्युतोऽशेषदोषैः सदा पूर्तितः।
उच्यते सर्ववेदोरुवादैरजः स्वर्चितो ब्मह्मरुद्रेंद्रपूर्वैः सदा।
प्रीणयामो वासुदेवं देवतामंडलाखंडमंडनं।८।
धार्यते येन विश्वं सदाऽजादिकं वार्यतेऽशेषदुःखं निजाध्यायिनाम्।
पार्यते सर्वमन्यैर्न यत्पार्यते कार्यते चाखिलं सर्वभूतैः सदा।
प्रीणयामो वासुदेवं देवतामंडलाखंडमंडनं।९।

सर्वपापानि यत्संस्मृतेः संक्षयं सर्वदा यांति भक्त्या विशुद्धात्मनाम् ।
शर्वगुर्वादिगीर्वाण संस्थानदः कुर्वते कर्म यत्प्रीतये सज्जनाः ।
प्रीणयामो वासुदेवं देवतामंडलाखंडमंडनं ।१०।

अक्षयं कर्म यस्मिन् परे स्वर्पितं प्रक्षयं यांति दुःखानियन्नामतः ।
अक्षरो योऽजरः सर्व दैवामृतः कुक्षिगं यस्य विश्वं सदाऽजादिकम् ।
प्रीणयामो वासुदेवं देवतामंडलाखंडमंडनं ।११।

नंदितीर्थोरुसन्नामिनो नंदिनः संदधानाः सदानंददेवे मतिम् ।
मंदहासारुणाऽपांगदत्तोन्नतिं नंदिताशेषदेवादिवृंदं सदा ।
प्रीणयामो वासुदेवं देवतामंडलाखंडमंडनं ।१२।

॥ इति श्रीमन्मध्वाचार्य विरचिते श्री द्वादश स्तोत्रे अष्टमोऽध्यायः ॥